CS (MAIN) EXAM, 2010

Sl. No. 77

D-DTN-K-TLA

SANSKRIT

Paper I

(Literature)

Time Allowed : Three Hours	*Maximum Marks : 300*

INSTRUCTIONS

*Candidates should attempt Question Nos. **1** and **5** which are compulsory, and any **three** of the remaining questions, selecting at least **one** question from each Section.*

The number of marks carried by each question is indicated at the end of the question.

*Question Nos. **1**, **5** and **8** must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.*

Answers written in Sanskrit must be in Devanāgarī script.

(Contd.)

Optional Province · optionalprovince.com

Section 'A'

1. (a) अधोलिखितानां समाधानं विधीयताम् — 1×3=3

(i) 'जश्' इति प्रत्याहारेण के वर्णा बोध्यन्ते ?

(ii) मुखसहितया नासिकयोच्चार्यमाणस्य वर्णस्य का संज्ञा ?

(iii) वाच्यपरिवर्तनं क्रियताम् —
समवेता जना दुर्गाप्रतिमां पश्यन्ति ।

(b) अधोनिर्दिष्टानां पदानां नियमोल्लेखपूर्वकं सन्धिविच्छेदः क्रियताम् । 3×4=12

रवावुदिते, यद्यत्र, तट्टीका, उत्थानम् ।

(c) अधःस्थितेषु वाक्येषु रेखाङ्कितानां पदानां कारणोल्लेख-पूर्वकं विभक्तिर्विचार्य्यताम् — 4×5=20

(i) मोदकः शिशुभ्यो रोचते ।

(ii) जनोऽयम् अक्ष्णा काणः ।

(iii) पाचकः पाकाय याति ।

(iv) पथिकोऽसौ व्याघ्राद् बिभेति ।

(v) परिचारिका गां दुग्धं दोग्धि ।

(d) अधोलिखितानां पदानां विग्रहवाक्यं प्रदर्श्यतां समासनाम चोल्लिख्यताम् — 5×5=25

(i) प्रत्यक्षम्

(ii) नीलोत्पलम्

(iii) वीणापाणिः

(iv) रामलक्ष्मणौ

(v) पञ्चवटी

Optional Province · optionalprovince.com

2. (a) नामपद-क्रियापदयोः रूपप्रयोगवैचित्र्यमवलम्ब्य वैदिक-संस्कृतस्य प्रकृतिः वर्ण्यताम् । 30

(b) लौकिकसंस्कृतस्य प्रमुखाः विशेषताः विचार्यन्ताम् । 30

3. (a) अलङ्कारसम्प्रदायं समुपन्यस्य तस्य आचार्यस्य जयदेवस्य मतं विविच्यताम् । 30

(b) किं नाम औचित्यं साहित्ये ? तद्विचारचर्चा विधीयताम् । 30

4. (a) भवभूतेः कस्यचिद् एकस्य नाटकस्य वैशिष्ट्यं विचार्यताम् । 30

(b) कस्यचिद् आधुनिककवेः महाकाव्यस्य समीक्षा विधीयताम् । 30

Section 'B'

5. अधोलिखितेषु विषयद्वयमवलम्ब्य प्रत्येकं 175 शब्दपरिमितौ निबन्धौ संस्कृतभाषया देवनागर्यक्षरैः लिख्येताम् — 30+30

Write two essays in about 175 words each in Sanskrit on any two of the following topics using Devanagari script.

(a) शिक्षाव्यवस्थायां नैतिकमूल्यावबोधस्य संयोजनम् ।

(b) अद्यत्वे शिक्षासंस्थासु संरक्षणव्यवस्थायाः युक्तियुक्तता ।

(c) आजीविकारूपेण पत्रकारता ।

(d) विद्या ददाति विनयम् ।

6. (a) स्मृतिशास्त्रोक्तानां प्रमुखानां संस्काराणां नामोल्लेखपूर्वकं भवन्मते महत्त्वपूर्णं संस्कारत्रयं निर्वाच्यताम् । 30

(b) पुरुषार्थचतुष्टयस्य संयोजनव्यवस्थायाः वैशिष्ट्यम् आविष्क्रियताम् । 30

Optional Province · optionalprovince.com

7. (a) वेदान्तदर्शने षट्सम्प्रदायानां नामोल्लेखपूर्वकं तेषु मिथः भेदः विविच्यताम् । 30

(b) सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः — वचनम् एतद् विचार्यताम् । 30

8. अधोलिखितं सन्दर्भं साभिनिवेशं पठित्वा प्रदत्तानां प्रश्नानां यथोचितमुत्तरं प्रदीयताम् । 10×6=60

Answer the questions in Sanskrit on the basis of the passage given below :

कस्मिंश्चिद् वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ वीर्यातिरेकात् प्रत्यहं मृगशशकादीननेकान् पशून् व्यापादयति स्म । अथैकदा सर्वे पशवो मिलितास्तमभ्युपेत्य प्रोचुः — स्वामिन् ! किमनेन प्रतिदिनमनेकपशुवधश्रमेण ? एकेनैव पशुना तव प्रात्यह्निकी भोजनतृप्तिः पर्याप्ता स्यात् । तत् क्रियतामस्माभिः सह समयबन्धः । अद्य प्रभृति तवात्रोपविष्टस्य आहारार्थमेकैकः पशुः पर्ययेण प्रत्यहं समेष्यति । एवं कृते तव प्राणयात्रा क्लेशरहिता भवेत् । अस्माकमपि युगपत् सर्वोच्छेदनं न स्यात् ।

अथ तेषां वचनं श्रुत्वा भासुरकः प्रोक्तवान् — सत्यमभिहितं भवद्भिः । भवतां वचनमनुजाने । परन्तु ममात्रोपविष्टस्य आहारार्थं यदि कदाचित् कश्चित् पशुर्नागच्छेत् तर्हि सर्वान् वो मारयित्वा वनमिदं पशुरहितं करिष्यामि । अथ ते पशवस्तथैव प्रतिज्ञाय पर्ययेण एकैकं पशुं तत्समीपे प्रेषयन्तः कथञ्चित् स्वस्था न्यवसन् ।

Optional Province · optionalprovince.com

अथ कदाचित् कस्यचित् वृद्धस्य शशकस्य वारः समायातः । सोऽचिन्तयत् —

उपायं कञ्चिदुद्भाव्य करिष्ये सिंहघातनम् ।
पञ्चत्वं चेद् गमिष्यामि किं भयेन ममाधुना ॥

एवं विचिन्त्य मन्दं मन्दं चलितः स विलम्बेन सिंहसमीपे समुपस्थितः । अत्यन्तक्षुधापीडितोऽसौ सिंहः, विलम्बेन समागतं तमालोक्य नितरां क्रुद्धः तं पृष्टवान् — कुतस्त्वं विलम्बेनागतोऽसि ? शशकोऽब्रवीत् — देव ! नाहमपराद्धः । यथाकालमागच्छन्नहं पथि सिंहान्तरेण बलाद् धृतः । तस्याग्रे पुनर्गमनाय शपथं कृत्वा स्वामिने भवते निवेदयितुमागतोऽस्मि । श्रुत्वैतत् सिंहः सकोपमाह — सत्वरं गत्वा दर्शय क्वासौ दुरात्मा तिष्ठतीति । ततः शशकस्तं मार्गावस्थितस्यैकस्य गभीरस्य कूपस्य समीपं नीत्वा कूपजले पतितं तस्यैव सिंहस्य प्रतिबिम्बं सिंहान्तरत्वेन अदर्शयत् । कोपाविष्टो भासुरकोऽपि तदेव सत्यं मन्यमानः कूपजले आत्मप्रतिबिम्बस्योपरि निपत्य पञ्चत्वं गतः ।

(a) कोऽयं भासुरकः ? स कुत्र न्यवसत् ? किं चाकरोत् ?

(b) सर्वे पशवो मिलितास्तं किमब्रुवन् ?

(c) भासुरकेन किमुत्तरं दत्तम् ?

(d) शशकस्य वारे समायाते तेन किं कृतम् ?

(e) शशकः सिंहाय विलम्बागमनस्य किं कारणमदर्शयत् ?

(f) सिंहः कथं पञ्चत्वं गतः ?

Optional Province · optionalprovince.com